Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

10188

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

Serving Jinshasan
073519
gyanmandir@kobatirth

वैदिकः पौराणिकश्च

# सर्वदेवसामान्यो देवपूजनप्रयोगः ॥

मूल्यं ८ आणकाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वैदिकः पौराणिकश्च

# सर्वदेवसामान्योदेवपूजनप्रयोगः ॥

( अमृतवर्षिणीटिप्पणीसमन्वितः )

संयोजकः—शास्त्री अमृतलाल त्रिकमजी आचार्य.

( सौराष्ट्रदेशान्तर्गतजामनगरनिवासी )

## अथ पंचायतनदेवतास्थापनप्रकारः[1] ॥

| श्रीशिवपञ्चायतन. | श्रीविष्णुपञ्चायतन. | श्रीसूर्यपञ्चायतन. | श्रीदेवीपञ्चायतन. | श्रीगणेशपञ्चायतन. |
|---|---|---|---|---|
| विष्णु. सूर्य. | शिव. गणेश. | शिव. गणेश. | विष्णु. शिव. | विष्णु. शिव. |
| २ ३ | २ ३ | २ ३ | २ ३ | २ ३ |
| शिव. | विष्णु. | सूर्य. | देवी. | गणेश. |
| १ | १ | १ | १ | १ |
| देवी. गणेश. | देवी. सूर्य. | देवी. विष्णु. | सूर्य. गणेश. | देवी. सूर्य. |
| ५ ४ | ५ ४ | ५ ४ | १ ४ | ५ ४ |

१ शम्भौ मध्यगते हरीनहरभूदेव्यो हरौ शङ्करेभास्येनागसुता रवौ हरगणेशाजाम्बिकाः स्थापिताः ॥
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरेनार्याः शङ्करभागतोऽतिसुखदा व्यस्तास्तु ते हानिदाः ॥

स.पू.१

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीगणेशाय नमः ॥ कर्ता प्रातःकाले मङ्गलं स्नानं कृत्वा अहते अधरीयोत्तरीये प्रक्षालिते वा शुद्धे [1]श्वेते वस्त्रोपवस्त्रे धृत्वोपलिप्ते शुद्धदेशे गृहे श्रीपर्ण्यादियज्ञियवृक्षकाष्ठनिर्मिते दारुपीठे कुशकम्बलाद्यन्यतरास्तृते शुभासने प्राङ्मुख उदङ्मुखो वोपविश्य प्रातःसन्ध्यां कृत्वा स्वेष्टदेवस्य पूजनं कुर्यात् ॥ तत्रादौ शिखाबन्धनम् । हस्ते जलमादाय । मानस्तोक० इति मन्त्रस्य कुत्स ऋषिः । जगती च्छन्दः । एको रुद्रो देवता । शिखाबन्धने विनियोगः ॥ ॐमानस्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः ॥ मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तः सदमित्त्वाहवामहे ॥ १६/१६ ॥ ऊर्ध्वकेशि विरूपाक्षि मांसशोणितभोजने । तिष्ठ देवि शिखाबन्धे चामुण्डे चापराजिते ॥ विष्णोर्नामसहस्रैस्तु शिखाबन्धं करोम्यहम् ॥ इति मंत्रेण [2]शिखां बध्नीयात् ॥ स्वदक्षिणवामकरयोः कुशपवित्रं धारयेत् ॥

---

१ ब्राह्मणस्य सितं वस्त्रं माञ्जिष्ठं नृपतेः स्मृतम् । पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते ॥ मनुः ॥

२ मध्ये तु बह्वृचाश्चैव निबध्नीयुः शिखां ततः । माध्यन्दिनाश्च ये विप्राः पार्श्वे दक्षिणतः क्रमात् । वामपार्श्वे तु बध्नीयुर्ये विप्राः सामगायनाः । इति चतुर्विंशतितत्त्वे ।

For Private and Personal Use Only

ॐ पवित्रेस्स्थो वैष्णव्यौ सवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्रेण सूर्य्यस्य रश्मिभिः ॥ १/२ ॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्काम ं पूने तच्छकेयम् ॥ ४/४ ॥ अनामामूलदेशेऽथ वामदक्षिणहस्तयोः । पवित्रं धारयाम्यद्य कौशं वा हेमनिर्मितम् ॥ यथा वज्रं सुरेन्द्रस्य यथा चक्रं हरेस्तथा ॥ त्रिशूलं च त्रिनेत्रस्य तथा मम पवित्रकम् ॥ इति स्वदक्षिण-वामकरयोरनामिकामूलदेशे धारयेत् ॥ ततः स्वयं त्रिपुण्ड्रम् ऊर्ध्वपुण्ड्रं वा स्वकीयभाले तिलकं कुर्यात् ॥ ॐ स्वस्ति नऽइन्द्रो वृद्धश्श्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्द्दधातु ॥ १९/२५ ॥ स्वस्तिस्तु या विनाशाख्या धर्मकल्याणवृद्धिदा । विनायकप्रिया नित्यं ताञ्च स्वस्तिं ब्रुवन्तु नः ॥ आचमनम् । [1]ॐ केशवाय नमः स्वाहा । ॐ नारायणाय नमः स्वाहा । ॐ माधवाय नमः स्वाहा । ॐ गोविन्दाय नमः इति हस्तं प्रक्षाल्य । प्राणायामं कुर्यात् । हस्ते जलमादाय । प्रणवस्य

---

१ अनुपनीतानाम् आचमने । ह्रीं केशवाय नमः । ह्रीं नारायणाय नमः । ह्रीं माधवाय नमः । ह्रीं गोविन्दाय नमः इति हस्तं प्रक्षालयेत् ।

परब्रह्म ऋषिः । परमात्मा देवता । दैवी गायत्री च्छन्दः । भूरादिसप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः । अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः । क्रमेण गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि । तत्सवितुरित्यस्य विश्वामित्र ऋषिः । सविता देवता । गायत्री च्छन्दः । आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः । ब्रह्माग्निवायुसूर्या देवताः । यजुश्छन्दः । सर्वेषां प्राणायामे विनियोगः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॥ ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् । ॐ आपोज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ ॐ नमो भगवते वासुदेवाय इति भगवन्नाममंत्रेण वा ॥ एवं पूरककुम्भकरेचकक्रमेण त्रि[1]वारं प्राणायामं कुर्यात् ॥ ततः शान्तिसूक्तं पठेत् ॥

१ दक्षिणे रेचयेद्वायुं वामेनापूरितोदरम् । कुम्भकेन जपं कुर्यात्प्राणायामो भवेदिति ॥ कात्यायनः । सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतः प्राणः प्राणायामः स उच्यते ॥ याज्ञवल्क्यः ॥

अथ शान्तिसूक्तम्[1] ॥ ॐ आनोभद्राःक्रतवोयन्तुविश्वतोदब्धासोऽ-
अपरीतासऽउद्भिदः ॥ देवानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षिता-
रोदिवेदिवे ॥ १ ॥ देवानाम्भद्रासुमतिर्ऋजूयतान्देवानांरातिरभि-
नोनिवर्त्तताम् ॥ देवानांसख्यमुपसेदिमावयन्देवानऽआयुःप्रतिर-
न्तुजीवसे ॥ २ ॥ तान्पूर्वयानिविदाहूमहेव्वयम्भगंमित्रमदितिन्दक्ष-
मस्रिधम् । अर्य्यमणंव्वरुणꣳसोममश्विनासरस्वतीनःसुभगामयस्करत्
॥ ३ ॥ तन्नोवातोमयोभुव्वातुभेषजन्तन्मातापृथिवी तत्पिताद्यौः ॥
तद्ग्रावाणः सोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४ ॥
तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसेहूमहेव्वयम् ॥ पूषानो-

---

१ पुराणोक्तं शान्तिसूक्तम् ॥ याः श्रीः स्वयं सुकृतिनां भवनेष्वलक्ष्मीः पापात्मनां कृतधियां हृदयेषु बुद्धिः । श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ १ ॥ किं वर्णयाम तव रूपमचिन्त्यमेतत्किंचातिवीर्यमसुरक्षयकारि भूरि । किं चाहवेषु चरितानि तवाति यानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ २ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषैर्न ज्ञायसे हरिहरादिभिरप्यपारा । सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथाव्वेदसामसद्वृधेरक्षितापायुरदब्धः स्वस्त्तये ॥ ५ ॥ स्वस्त्तिनऽइन्द्रो-
वृद्धश्श्रवाः स्वस्त्तिनः पूषाव्विश्ववेदाः ॥ स्वस्त्तिनस्ताक्ष्योऽअरिष्टनेमिः
स्वस्त्तिनोबृहस्प्पतिर्द्दधातु ॥ ६ ॥ पृषदश्वामरुतः पृश्निमातरः शुभँयावा-
नोव्विदथेषुजग्ग्मयः ॥ अग्ग्निजिह्वामनवः सूरचक्षसोव्विश्वेनोदेवाऽ-
अवसागमन्निह ॥ ७ ॥ भद्रङ्कर्ण्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्ष-
भिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहिदेवहितँयदायुः
॥ ८ ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रानश्चक्राजरसन्तनूनाम् ॥ पुत्रा-
सोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्ग्गन्तोः ॥ ९ ॥ अदितिर्द्यौ-
रदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः ॥ व्विश्वेदेवाऽअदितिः-
पञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्त्वम् ॥ १० ॥ द्यौः शान्तिरन्तरिक्षᳬ-
शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ व्वनस्प्पतयः शान्ति-
र्व्विश्वेदेवाः शान्तिर्ब्ब्रह्मशान्तिः सर्व्वᳬशान्तिः शान्तिरेवशान्तिः सामाशा-
न्तिरेधि ॥ ११ ॥ यतोयतः समीहसेततोनोऽअभयङ्कुरु ॥ शन्नः कुरुप्प्र-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाभ्योभयन्नःपशुभ्यः ॥१२॥ शान्तिः शान्तिः सुशान्तिर्भवतु ॥ ततो देवान् प्रणमेत् । श्रीमन्महागणाधिपतये नमः । इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः । स्थानदेवताभ्यो नमः । वास्तुदेवताभ्यो नमः । वाणीहिरण्यगर्भाभ्यां नमः । श्रीलक्ष्मीनारायणाभ्यां नमः । उमामहेश्वराभ्यां नमः । शचीपुरन्दराभ्यां नमः । मातापितृचरणकमलेभ्यो नमः । सर्वेभ्यो देवेभ्यो नमः । सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः । एतत्कर्मप्रधानदेवताभ्यो नमः । पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु । पुण्यं पुण्याहं दीर्घमायुरस्तु । सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो विनायकः । धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि । विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ सर्वमङ्गलमाङ्गल्ये शिवे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान्मङ्गलायतनो हरिः ॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते ! तेऽङ्घ्रियुगं स्मरामि ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये ॥ सङ्कल्पः ॥ विष्णुर्विष्णुर्विष्णुः । श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे (सप्तमे) वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे (भरतखण्डे जम्बूद्वीपे रामक्षेत्रे परशुरामाश्रमे दण्डकारण्ये श्रीगोदावर्याः अमुकदिग्भागे श्रीमल्लवणाब्धेः अमुके तटे ) आर्यावर्तान्तर्गतब्रह्मावर्तस्य अमुकैकदेशे अमुके श्रीशालि-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाहनशके अमुकनामसंवत्सरे तथा च अमुके श्रीविक्रमवर्षे अमुकनामसंव-
त्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे
अमुकनक्षत्रे अमुकयोगे अमुककरणे अमुकराशिस्थिते चन्द्रे अमुकराशि-
स्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थान-
स्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ मम अमुकगोत्रो-
त्पन्नस्य अमुकशर्मणः (वर्मणः गुप्तस्य दासस्य वा) सपरिवारस्य आत्मनः
श्रुतिस्मृतिपुराणोक्तपुण्य (पुराणोक्त) फलावास्यर्थं (मम ऐश्वर्याभि-
वृद्ध्यर्थम् अप्राप्तलक्ष्मीप्राप्त्यर्थं प्राप्तलक्ष्म्याश्चिरकालसंरक्षणार्थं सकलमन-
ईप्सितकामनासंसिद्ध्यर्थं लोके वा सभायां राजद्वारे वा सर्वत्र यशो-
विजयलाभादिप्राप्त्यर्थं तथा च मम सभार्यस्य सपुत्रस्य अखिलकुटुम्बसहि-
तस्य सपशोः समस्तभयव्याधिजरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्या-
भिवृद्ध्यर्थं तथा च मम जन्मराशेरखिलकुटुम्बस्य वा जन्मराशेः सकाशाद्ये
केचिद्विरुद्धचतुर्थाष्टमद्वादशस्थानस्थिताः क्रूरग्रहाः तैः सूचितं सूचयिष्य-
स.पू.२ माणञ्च यत्सर्वारिष्टं तद्विनाशद्वारा सर्वदा तृतीयैकादशस्थानस्थितवच्छुभ-

For Private and Personal Use Only

फलप्राप्त्यर्थं पुत्रपौत्रादिसन्ततेरविच्छिन्नवृद्ध्यर्थम् आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थम् इन्द्रादिदशदिक्पालप्रसन्नतासिद्ध्यर्थम् आधिदैविकाऽधिभौतिकाध्यात्मिकत्रिविधतापोपशमनार्थं धर्मार्थकाममोक्षफलावात्यर्थम् यथाज्ञानेन यथामिलितोपचारद्रव्यैः ध्यानावाहनादिषोडशोपचारैरन्योपचारैश्च अमुकदेवस्य पूजनं करिष्ये ॥ पुनर्जलं गृहीत्वा । तत्रादौ दिग्रक्षणं कलशार्चनं शङ्खघण्टाद्यर्चनञ्च करिष्ये ॥ दिग्रक्षणम् ॥ वामहस्ते सर्षपानादाय दक्षिणहस्तेनाच्छाद्य रक्षोघ्नमंत्रान्पठेत् ॥ ॐ रक्षोहणं-वलगहनंवैष्णवी मिदमहन्तंवलगमुत्किरामियम्मे निष्ठ्योयममात्त्यो निचखानदेमहन्तंवलगमुत्किरामियम्मेसमानोयमसमानो निचखानेदमहन्तं वलगमुत्किरामियम्मेसबन्धुरुर्थमसंबन्धुर्निचखानेदमहन्तम्वलगमु-

---

१ आवाहनासने पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीते च गन्धमाल्यादिभिः क्रमात् ॥ धूपं दीपञ्च नैवेद्यं नमस्कारं प्रदक्षिणाम् । उद्वासनं षोडशकमेवं देवार्चने विधिः ॥ नागदेवः । २ श्रीशिवपञ्चायतनदेवतानाम्, श्रीविष्णुपञ्चायतनदेवतानाम्, श्रीसूर्यपञ्चायतनदेवतानाम्, श्रीदेवीपञ्चायतनदेवतानाम्, श्रीगणेशपञ्चायतनदेवतानाम्, श्रीविष्णोः, श्रीगणेशस्य, श्रीशिवस्य, श्रीदेव्याः, श्रीसूर्यस्य वा ।



For Private and Personal Use Only

त्किरामियम्मैसज्ञातो यमसंजातोनिचखानोत्कृत्त्यांकिंरामि ॥ २३ ॥ रक्षोहणौंवोवलगहनःप्रोक्षामिवैष्णवान्त्रंक्षोहणौवोवलगहनोवनया- मिवैष्णवान्त्रंक्षोहणौवोवलगहनोवस्तृणामिवैष्णवान्त्रंक्षोहणौवांवल- गहनाऽउपदधामिवैष्णवीरक्षोहणौ वांवलगहनौपरुयूँहामिवैष्णवीवै- ष्णवमसिवैष्णवास्थ ॥ २५ ॥ रक्षसांभागोसिनिरस्तःरक्षऽइदमहः- रक्षोभितिष्ठामीदमहःरक्षोवंबाधऽइदमहःरक्षौधमन्तमौनयामि ॥ घृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्निराज्यस्यवेतुस्वाहा- स्वाहाकृतेऽऊर्द्ध्वंनभसम्मारुतङ्गच्छतम् ॥ २६ ॥ रक्षोहाविश्वचर्षणिर- भियोनिमयोहते । द्रोणेसधस्थमासदत ॥ २६ ॥ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥ अप- क्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामवरोधेन पूजाकर्म समारभे ॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः । स्थानं त्यक्त्वा तु यत्सर्वं यत्रस्थं तत्र गच्छतु । भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि भुवं त्विमाम् ॥ भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन । ते सर्वेऽप्यपगच्छन्तु देवपूजां करोम्यहम् ॥ एतैर्मन्त्रैः सर्षपान्दिक्षु विदिक्षु च विकीर्य वामपादेन भूमिं त्रिवारं ताडयेत् । ततः शरीरशुद्ध्यर्थं स्वदक्षिणहस्ते जलं गृहीत्वा स्वदक्षिण-वामनेत्रयोरुदकस्पर्शं कुर्यात् ॥

अथ कलशार्चनम् ॥ स्ववामभागे अक्षतपुञ्जोपरि जलपूरितं कलशं संस्थाप्य तत्र वरुणावाहनम् ॥ तत्त्वायामीत्यस्य शुनःशेप ऋषिः । त्रिष्टुप् छन्दः । वरुणो देवता । वरुणावाहने विनियोगः ॥ ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोद्ध्युरुशꣳसमानऽआयुःप्रमोषीः ॥ ४९/१८ ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ ॐ[1] भूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकं आवाहयामि

१ "ॐ भूर्भुवः स्वः" स्थानेऽनुपनीतानां वैश्यादीनां "ह्रीं" इति पदं देयम् । यत्र यत्र ॐकारस्तत्र सर्वत्रैवं बोध्यम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थापयामि ॥ प्रतिष्ठापनम् ॥ ॐमनोजूतिर्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टंय्यज्ञ६समिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोम्प्रतिष्ठ ॥ ॥ भगवन्वरुणागच्छ त्वमस्मिन् कलशे प्रभो !। कुर्वेऽत्रैव प्रतिष्ठां ते जलानां शुद्धिहेतवे ॥ ॐवरुणाय नमः ॥ वरुण ! सुप्रतिष्ठितो वरदो भव ॥ कलशस्य चतुर्दिक्षु गन्धेन चतुर्वेदान्पूजयेत् । पूर्वे ऋग्वेदाय नमः ॥ दक्षिणे यजुर्वेदाय नमः ॥ पश्चिमे सामवेदाय नमः ॥ उत्तरे अथर्वणवेदाय नमः ॥ कलशमध्ये अपाम्पतये वरुणाय नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ अनामिकया कलशं स्पृशेत् ॥ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्त द्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा । आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥ गङ्गे च यमुने चैव

For Private and Personal Use Only

गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ! । तेन सत्येन मे देव तीर्थं देहि दिवाकर ॥ कलशं प्रार्थयेत् ॥ देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ ! विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव ! । सान्निध्यं कुरु मे देव ! प्रसन्नो भव सर्वदा ॥ [1]अङ्कुशमुद्रया सूर्यमण्डलात्सर्वाणि तीर्थान्यावाह्य । वम् इति धे[2]नुमुद्रया अमृतीकृत्य । हूँ इति कवचेनावगुण्ठ्य

---

१ दक्षमुष्टिगृहीतस्य वाममुष्टेस्तु मध्यमाम् । प्रसार्य तर्जन्याऽऽकुञ्चेत्सेयमङ्कुशमुद्रिका ॥ शारदातिलके ।
२ दक्षानामासमायुक्ता वामहस्तकनिष्ठिका । वामानामासमायुक्ता दक्षपाणिकनिष्ठिका ॥ दक्षस्य मध्यमाऽऽक्रान्ता वामहस्तस्य तर्जनी ॥ वाममध्यमयाऽऽक्रान्ता दक्षहस्तस्य तर्जनी । संयुक्तौ कारयेद्विद्वानङ्गुष्ठावुभयोरपि ॥ धेनुमुद्रा निगदिता गोपिता साधकोत्तमैः ॥



For Private and Personal Use Only

[1]मत्स्यमुद्रयाऽऽच्छाद्य। वं वरुणाय नमः इत्यनेनाष्टवारमभिमन्त्र्य तस्मादुदकादुदकं गृहीत्वा स्वात्मानं सम्प्रोक्षेत्॥ ॐ आपो हिष्ठा मयो० ॥ [2]कलशमुद्रां प्रदर्शयेत्। पुनर्जलं गृहीत्वा। पूजाद्रव्याणि भूमिञ्च प्रोक्षयेत्। अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा॥ यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरं शुचिः॥ शङ्खपूजनम्॥ ॐअग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः॥ तमीमहेमहागयम्॥ऋ०॥ शङ्खादौ चन्द्रदैवत्यं कुक्षौ वरुणदेवता। पृष्ठे प्रजापतिश्चैव ह्यग्रे गङ्गा सरस्वती॥ १॥ त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया। शङ्खे तिष्ठन्ति विप्रेन्द्र तस्माच्छङ्खं प्रपूजयेत्॥ २॥ त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे। निर्मितः सर्वदेवैश्च पाञ्चजन्य! नमोऽस्तु ते॥ ३॥ पाञ्चजन्याय विद्महे पावमानाय धीमहि। तन्नः शङ्खः प्रचोदयात्॥४॥ ॐ भूर्भुवः स्वः शङ्खस्थदेवतायै नमः सर्वोपचारार्थे

१ अधोमुखावुभौ हस्तौ स्वस्योपरि च संस्थितौ। पार्श्वद्वयगताङ्गुष्ठौ मत्स्यमुद्रेयमीरिता॥ २ दक्षाङ्गुष्ठं पुरोऽङ्गुष्ठे (वामङ्गुष्ठे) क्षिप्त्वा हस्तद्वयेन च। सावकाशां (मध्यमाशून्यां) मुष्टिकाञ्च कुर्यात्सा कुम्भ (कलश) मुद्रिका।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गन्धाक्षतपुष्पाणि सम० ॥ [1]शङ्खमुद्रां प्रदर्शयेत् ॥ घण्टापूजनम् ॥
ॐ सुपर्णोऽसिगरुत्मॉंस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ ।
स्तोमऽआत्माच्छन्दा७स्यङ्गानियजू७षिनाम । सामंतेतनूर्वामदेव्यँय्यँ-
ज्ञायज्ञियम्पुच्छन्धिष्ण्याः शफाः ॥ सुपर्णोसि गरुत्मान्दिवङ्ग-
च्छस्वःपत ॥ १२/४ ॥ आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ घण्टानादं
प्रकुर्वीत पश्चाद् घण्टां प्रपूजयेत् ॥ ॐ भूर्भुवः स्वः घण्टास्थिताय गरुडाय
नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ [2]घण्टामुद्रां प्रदर्शयेत् ॥
दीप[3]पूजनम् ॥ घृतदीपं प्रज्वाल्य निर्वातस्थले अक्षतपुञ्जोपरि पात्रे वा
निधाय ॥ ॐअग्निर्ज्योतिषाज्योतिष्मान्रुक्मोवर्चसावर्चस्वान् ॥ सहस्र-
दाऽअसिसहस्रायत्त्वासह ॥ ४०/१३ ॥ भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत् ।

---

१ वामाङ्गुष्ठं तु सङ्गृह्य दक्षिणेन तु मुष्टिना । कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसारयेत् ॥ १ ॥ वामाङ्गुल्यस्तथाऽऽश्लिष्टाः संयुक्ताः सुप्रसारिताः । दक्षिणाङ्गुष्ठसंस्पृष्टा ज्ञेयैषा शङ्खमुद्रिका ॥ २ ॥ २ मिथस्तर्जनिके श्लिष्टे श्लिष्टावङ्गुष्ठकौ तथा । मध्यमानामिके तु द्वौ पक्षाविव विचालयेत् । एषा गरुड ( घण्टा ) मुद्रा स्याद्विष्णोः सन्तोषवर्धिनी ॥ ३ कार्पासवर्तिका प्रोक्ता दीपकृत्येषु सर्वदा । न चैव स्थापयेद्दीपं साक्षाद्भूमौ कदा च न ॥ इति सुदर्शने ।



For Private and Personal Use Only

**यावत्कर्मसमाप्तिः स्यात्तावदत्र स्थिरो भव ॥ ॐ भूर्भुवः स्वः दीपस्थदेवतायै नमः आवाहयामि सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ अत्र यस्य देवस्य पूजनं क्रियते तस्य देवस्य ध्यानपूर्वकमावाहनं**

---

अथ (१) शिवध्यानम् ॥ ध्याये नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥ ॐ नमस्ते रुद्रमन्यवऽउतोतऽइषवे नमः ॥ बाहुभ्यामुतते नमः ॥ १६/१ ॥ अथ (२) विष्णुध्यानम् ॥ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ॥ लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाᳪसुरेस्वाहा ॥ ५/१५ ॥ अथ (३) सूर्यध्यानम् ॥ ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः ॥ केयूरवान्मकरकुण्डलवान्किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥ ॐ आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतं मर्त्यञ्च ॥ हिरण्ययेनसवितारथेनादेवोयातिभुवनानिपश्यन् ॥ ३४/३१ ॥ अथ (४) गणपतिध्यानम् ॥

स.पू. ३

कुर्यात् ॥ आवाहनम् ॥ ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३१ ॥ आगच्छ भगवन्देव स्थाने चात्र स्थिरो भव । यावत्पूजां करिष्यामि तावत्त्वं सन्निधो भव ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः अमुकदेवम् आवाहयामि । आवाहनार्थेऽक्षतान्समर्पयामि ॥ प्रतिष्ठापनम् ॥ ॐमनोजूतिर्जुषता० ॥ अस्यां मूर्तौ

---

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ॥ दोर्भिः पाशाङ्कुशाब्जाभयवरदधतं चन्द्रमौलिं त्रिनेत्रं ध्याये शान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ ॐ गणानान्त्वा गणपतिंहवामहे-प्प्रियाणान्त्वाप्प्रियपतिंहवामहे निधीनान्त्वानिधिपतिं हवामहेवसोमम । आहम-जानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ २३/१९ ॥ अथ (५) शक्ति (देवी) ध्यानम् ॥ विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां कन्याभिः करवालखेटविलसद्धस्ताभि-रासेविताम् ॥ हस्तैश्चक्रगदासिखेटविशिखाँश्चापं गुणं तर्जनीं बिभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे ॥ ॐ प्राणायस्वाहापानायस्वाहा व्यानायस्वाहा ॥ अम्बेऽ-अम्बिकेम्बालिकेनमानयतिकश्चन । ससस्त्यकश्श्वःसुभद्रिकांकाम्पीलवासिनीम् ॥ २३/१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमुकदेवः सुप्रतिष्ठितो वरदो भव इति [1]पुष्पाण्यक्षतान्वा प्रतिमादौ निदध्यात् ॥ तत [2]आवाहनमुद्रां प्रदर्शयेत् ॥ आसनम् ॥ ॐ पुरुषऽए-वेद६सर्व्वंऽयद्भूतँऽयच्चभाव्यम् । उतामृतत्त्वस्येशानोयदन्नेना तिरोहति ॥ ३१/२ ॥ रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मया दत्तं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः आसनं समर्पयामि ॥ पाद्यम् ॥ ॐ एतावानस्यमहिमातोज्यायाँश्चपूरुषः ॥ पादो-स्यविश्वाभूतानित्रिपादस्यामृतन्दिवि ॥ ३१/११ ॥ उष्णोदकं निर्मलं च सर्व-सौगन्ध्यसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ॐभूर्भुवः स्वः अमुकदेवाय नमः पाद्यं समर्पयामि ॥ अर्घ्यम् ॥ ॐ धामन्तेविश्व-म्भुवनमधिश्रितमन्तः समुद्रेहृद्यन्तरायुषि ॥ अपामनीकेसमिथेयऽआभृ-

---

१ हस्ताभ्यामञ्जलिं बद्ध्वाऽनामिकामूलपर्वतः । अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता ॥
२ आनीय तेजः स्वस्थानान्नासिकारन्ध्रनिर्गतम् । करस्थमातृकाम्भोजे चैतन्यं पुष्पसञ्चये ॥ संयोज्य ब्रह्मरन्ध्रेण मूर्तावावाहयेत्सुधीः । देवं सुषुम्णामार्गेण चानीय ब्रह्मरन्ध्रकम् ॥ वामनासापुटे ध्यात्वा निर्यान्तं स्वाञ्जलिस्थितम् ॥ पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेत् ॥ इति शारदातिलके ।

For Private and Personal Use Only

 तस्त्वमंश्श्यामममधुमन्तन्तऽऊर्म्मिम् ॥ ११/१७ ॥ रौप्यपात्रे स्थितं तोयं गन्ध- 
 पुष्पफलान्वितम् । सहिरण्यं ददाम्यर्घं गृहाण परमेश्वर ! ॥ ॐ भूर्भुवः 
स्वः अमुकदेवाय नमः अर्घं समर्पयामि ॥ आचमनीयम् ॥ ॐ इमम्मे-
वरुणश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ १/१२ ॥ सर्वतीर्थसमायुक्तं
सुगन्धि निर्मलं जलम् । आचामार्थं मया दत्तं गृहाण परमेश्वर ! ॥ ॐ
भूर्भुवः स्वः अमुकदेवाय नमः आचमनीयं समर्पयामि ॥ पयःस्नानम् ॥
ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्युन्तरिक्षेपयोधाः ॥ पयस्वतीः
प्रदिशः सन्तुमह्यम् ॥ ३५/१८ ॥ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम् ।
पावनं यज्ञहेतु च पयः स्नानार्थमर्पितम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय
नमः पयःस्नानं सम० । पयःस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदक-
स्नानान्ते आचमनीयं समर्पयामि ॥ दधिस्नानम् ॥ ॐ दधिक्राव्णोऽ- 
अकारिषञ्जिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणऽआयूꣳ-
षितारिषत् ॥ ३३/२३ ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यानीतं

मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः दधिस्नानं सम० । दधिस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ घृतस्नानम् ॥ ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृते-श्रितोघृतम्वस्यधाम ॥ अनुष्ष्वधमावहमादयस्वस्वाहाकृतंवृषभवक्षिह-व्यम् ॥ ६६/१७ ॥ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः घृतस्नानं सम० । घृतस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ मधुस्नानम् ॥ ॐ मधुवाताऽऋतायतेमधुक्षरन्तिसिन्धवः ॥ माध्वीर्नःसन्त्वोषधीः ॥ २७/१३ ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौरस्तुनःपिता ॥ २/१३ ॥ मधुमान्नोवनस्पतिर्म्मधुमाँ२॥ अस्तुसूर्यः ॥ माध्वीर्गावोभवन्तुनः ॥ २९/१३ ॥ तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः-पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः मधुस्नानं समर्पयामि । मधुस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते

आचमनीयं सम० ॥ शर्करास्नानम् ॥ ॐ अपा ᳪ रसमुद्वयस ᳪ सूर्य्ये सन्त ᳪ स-
माहितम् ॥ अपा ᳪ रसस्य यो रसस्तम्वो गृह्णाम्म्युत्तममुपयामगृहीतोसी-
न्द्रायत्त्वाजुष्ट्टं गृह्णाम्म्येषते योनिरिन्द्रायत्त्वाजुष्टतमम् ॥ ३/२ ॥ इक्षुसारस-
मुद्भूता शर्करा पुष्टिकारिका । मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम् ॥
ॐ भूर्भुवः स्वः अमुकदेवाय नमः शर्करास्नानं सम० । शर्करास्नानान्ते
शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ गन्धोदक-
स्नानम् ॥ ॐ गन्धर्वस्त्वाविश्वावसुः परिदधातु विश्वस्यारिष्ट्यै यजमान-
स्य परिधिरस्यग्निरिडऽईडितः ॥ ३/२ ॥ मलयाचलसम्भूतं चन्दनागरु-
संयुतम् । चन्दनं च मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः
अमुकदेवाय नमः गन्धोदकस्नानं सम० । गन्धोदकस्नानान्ते शुद्धोदकस्नानं
सम० । शुद्धोदकस्नानान्ते आचमनीयं सम० ॥ उद्वर्तनस्नानम् ॥
ॐ अ ᳪ शुनाते ऽअ ᳪ शुः पृच्च्यताम्परुषापरुः ॥ गन्धस्ते सोममवतु मदाय-
रसो ऽअच्युतः ॥ ३७/२० ॥ नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं

मया दत्तं स्नानार्थं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः उद्वर्तनस्नानं सम० । उद्वर्तनस्नानान्ते शुद्धोदकस्नानं सम० । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि सम० ॥ ततो निर्माल्यमुत्तरे विसृज्य पुनः गन्धाक्षतपुष्पैरभ्यर्च्य गन्धमिश्रितैर्जलैरभिषेकं कुर्यात् ॥ ॐ अमृताभिषेकोऽस्तु । ॐ भूर्भुवः स्वः अमुकदेवाय नमः अभिषेकस्नानं सम० ॥ शुद्धोदकस्नानम् ॥ ॐ शुद्धवालः सर्वशुद्धवालोमणिवालस्तऽआश्विनाः श्येतः श्येताक्षोरुणस्तेरुद्राय पशुपतयेकर्णायामाऽअवलिप्तारौद्रानभोरूपाःपार्जन्याः ॥ ३/२४ ॥ स्नानार्थं तव देवस्य पवित्रं तोयमुत्तमम् । तीर्थेभ्यश्च समानीतं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः शुद्धोदकस्नानं समर्पयामि । शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि ॥ ततो देवं वस्त्रेण प्रोञ्छयित्वा पीठे निदध्यात् ॥ वस्त्रम् ॥ ॐ सुजातोज्योतिषासहशर्म्मवरूथमासदत्स्वः ॥ वासोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो ॥ ४०/११ ॥

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः वस्त्रं सम०। वस्त्रान्ते आचमनीयं सम० ॥ उपवीतम् ॥ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः यज्ञोपवीतं समर्पयामि। यज्ञोपवीतान्ते आचमनं सम० ॥ गन्धम् ॥ ॐत्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्प्पतिः ॥ त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत ॥ ९८/२१ ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्। विलेपनं सुरश्रेष्ठ गृहाण परमेश्वर ॥ ॐभूर्भुवः स्वः अमुकदेवाय नमः गन्धं समर्पयामि ॥ दक्षिणहस्तेन [1]गन्धमुद्रां प्रदर्शयेत्। [2]अक्षताः ॥ ॐ अक्षन्नमीदन्तह्यव

१ मध्यमानामिकाङ्गुष्ठैरङ्गुल्यग्रेण पार्वति। दद्याच्च विमलं गन्धं मूलमन्त्रेण साधकः ॥ कनिष्ठाङ्गुष्ठसंयुक्ता गन्धमुद्रा प्रकीर्तिता। इति शारदातिलके ॥ दक्षिणहस्तस्य कनिष्ठाङ्गुष्ठयोगेन गन्धमुद्रां प्रदर्शयेत्।
२ नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपम्। न दूर्वया यजेद्देवीं बिल्वपत्रैर्दिवाकरम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्प्रियाऽअधूषत ॥ अस्त्तौषतस्वभांनवोव्विप्प्रानविंष्ठयामतीयोजाव्विन्द्रते-
हरीं ॥ ५।१/३ ॥ अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्ताः सुशोभनाः । मया निवेदिता
भक्त्या गृहाण परमेश्वर ॥ ॐ भूर्भुव स्वः अमुकदेवाय नमः अक्षतान्
समर्पयामि ॥ पुष्पाणि ॥ ओषधीः प्प्रातिमोदद्ध्वम्पुष्प्पवतीः प्प्रसूवरीः ॥
अश्श्वाऽइवसजित्त्वरीर्व्वीरुधः पारयिष्णवः ॥ ७७/१२ ॥ माल्यादीनि सुग-
न्धीनि मालत्यादीनि वै प्रभो ! । मयाऽऽनीतानि पुष्पाणि पूजार्थं प्रति-
गृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः पुष्पाणि समर्पयामि ॥
दक्षिणहस्तेन पुष्पमुद्रां प्रदर्शयेत् ॥ ( दूर्वाङ्कुरान् ॥ काण्डात्काण्डात्प्र-
रोहन्तीपरुषः परुषस्प्परि ॥ एवानोदूर्व्वेप्प्रतनुसहस्त्रेणशतेनच ॥ २०/१३ ॥
दूर्वे ह्यमृतसम्पन्ने शतमूले शताङ्कुरे । शतं पातकसंहन्त्री शतमायुष्य-
वर्धिनी ॥ विष्णवादिसर्वदेवानां दूर्वे त्वं प्रीतिदा सदा । क्षीरसागरसम्भूते
वंशवृद्धिकरी भव ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः दूर्वाङ्कुरान्सम० ॥ )

२ ज्येष्ठा (मध्यमा) ङ्गुष्ठस्य पुष्पस्य युक्ता धूपस्य तर्जनी । दीपस्य मध्यमानामा नैवेद्यस्य प्रकीर्तिता । मुद्रया यत्कृतं कर्म तदक्षय्यफलप्रदम् ॥ दक्षिणहस्तस्य मध्यमाङ्गुष्ठयोगेन पुष्पमुद्रां प्रदर्शयेत् ।

For Private and Personal Use Only

सौभाग्यद्रव्याणि ॥ ॐ अहिंरिवभोगैःपर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नोविश्वावयुनानिविद्वान्पुमान्पुमांᳮसम्परिपातुविश्वतः ॥ ५१/२२ ॥ हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलान्वितम् । सौभाग्यद्रव्यमेतत्त्वं गृहाण परमेश्वर ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः सौभाग्यपरिमलद्रव्याणि समर्पयामि ॥ धूपम् ॥ धूरसिधूर्व्वधूर्वन्तन्धूर्व्वतँय्योस्मान्धूर्वतितन्धूर्व्वयंवयन्धूर्व्वामः ॥ देवानामसिवह्नितमᳮसस्नितमम्पप्रितमञ्जुष्टतमन्देवहूतमम् ॥ ८/१ ॥ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः धूपमाघ्रापयामि । [1]ततो दक्षिणहस्तेन धूपमुद्रां प्रदर्शयेत् ॥ दीपम् ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहासूर्य्योज्योतिर्ज्योतिःसूर्य्यःस्वाहा ॥ अग्निर्वर्च्चोज्योतिर्व्वर्च्चःस्वाहासूर्य्योवर्च्चोज्योतिर्व्वर्च्चःस्वाहा ॥ ज्योतिःसूर्य्यःसूर्य्योज्योतिःस्वाहा ॥ ९/३ ॥ आज्यञ्च वर्तिसंयुक्तं वह्निना योजितं

१ दक्षिणहस्तस्य तर्जन्यङ्गुष्ठयोगेन धूपमुद्रां प्रदर्शयेत् ॥



For Private and Personal Use Only

मया । दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः दीपं दर्शयामि ॥ [1]ततो दीपमुद्रां प्रदर्शयेत् ॥ नैवेद्यम् ॥ ॐ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ८३/११ ॥ शर्कराखण्डखाद्यानि दधिक्षीरघृतानि च । आहारं भक्ष्यभोज्यञ्च नैवेद्यं प्रतिगृह्यताम् ॥ गायत्रीं पठित्वा जलेन नैवद्यं सम्प्रोक्ष्य धेनुमुद्रयाऽमृतीकृत्य [2]ग्रासमुद्राः प्रदर्शयेत् ॥ ॐ [3]प्राणाय स्वाहा । ॐ [4]अपानाय स्वाहा । ॐ [5]व्यानाय स्वाहा । ॐ [6]उदानाय स्वाहा । ॐ [7]समानाय स्वाहा । ॐ भूर्भुवः स्वः अमुकदेवाय नमः नैवेद्यं निवेदयामि । पूर्वापोशनं सम० ॥ नैवेद्यमध्ये पानीयम् ॥ एलोशीरल-

---

१ दक्षिणहस्तस्य मध्यमानामिकाङ्गुष्ठेन दीपमुद्रां प्रदर्शयेत् ॥ २ ग्रासमुद्रां वामदोष्णा विकचोत्पलसन्निभाम् । प्रदर्शयन्दक्षिणेन प्राणादीनाञ्च दर्शयेत् ॥ ३ दक्षिणहस्तस्य कनिष्ठिकानामिकेऽङ्गुष्ठेन स्पृशन् प्राणाय स्वाहा इति । ४ दक्षिणहस्तस्य अनामामध्यमेऽङ्गुष्ठेन स्पृशन् अपानाय स्वाहा इति । ५ दक्षिणहस्तस्य मध्यमातर्जन्यावङ्गुष्ठेन स्पृशन् व्यानाय स्वाहा इति । ६ दक्षिणहस्तस्य तर्जनीमध्यमानामा अङ्गुष्ठेन स्पृशन् उदानाय स्वाहा इति । ७ दक्षिणहस्तस्य तर्जन्याद्यङ्गुलिचतुष्टयम् अङ्गुष्ठेन स्पृशन् समानाय स्वाहा इति । एताः पञ्च ग्रासमुद्राः प्रदर्शयेत् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वज्ञादिकर्पूरपरिवासितम् । दत्तं ते प्राशनार्थाय गृहाण सलिलं प्रभो ! ॥
ॐ भूर्भुवः स्वः अमुकदेवाय नमः मध्ये पानीयं सम० । उत्तरापोशनं
सम० । हस्तप्रक्षालनं सम० । मुखप्रक्षालनं सम० । आचमनीयं सम० ।
करोद्वर्तनार्थं गन्धं समर्पयामि ॥ मुखवासार्थं ताम्बूलम् ॥ ॐ उतस्म्मा-
स्यद्द्रवतस्तुरण्ण्यतः पुर्ण्णन्नवेरनुवातिप्प्रगर्द्धिनः ॥ श्येनस्येवद्ध्रजतो-
अङ्कसम्परिदधिक्क्राव्ण्णः सहोर्ज्जातरित्रतः स्वाहा ॥ १५/९ ॥ पूगीफलं मह-
द्दिव्यं नागवल्लीदलैर्युतम् । एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥
ॐ भूर्भुवः स्वः अमुकदेवाय नमः ताम्बूलं सम० ॥ फलम् ॥ ॐ याः
फलिनीर्या अफला अपुष्प्पायाश्च पुष्प्पिणीः ॥ बृहस्प्पतिप्प्रसूतास्त्ता-
नोमुञ्चन्त्वर्ठहसः ॥ ८९/१२ ॥ इदं फलं मया देव स्थापितं पुरतस्तव । तेन
मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः
फलं सम० ॥ दक्षिणाम् ॥ ॐ हिरण्ण्यगर्ब्भः समवर्त्तताग्ग्रे भूतस्य जातः
पतिरेकऽआसीत् ॥ सदाधार पृथिवीन्द्यामुतेमाङ्कस्म्मैदेवाय हविषा



For Private and Personal Use Only

विधेम ॥ ४/१३ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्य-
फलदमतः शान्तिं प्रयच्छ मे ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः
सुवर्णपुष्पदक्षिणां सम० ॥ कर्पूरारार्तिक्यम् ॥ ॐ आरात्रिपार्थिवꣳरजः
पितुरप्प्रायिधामभिः ॥ दिवःसदाꣳसिबृहतीवितिष्ठसऽआत्त्वेषंवर्त्तते-
तमः ॥ ३२/३४ ॥ ॐ अग्निर्द्देवतावातोदेवतासूर्य्योदेवताचन्द्रमादेवतावसवो
देवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्द्देव-
तेन्द्रोदेवतावरुणोदेवता ॥ २०/१४ ॥ कर्पूरगौरं करुणावतारं संसारसारं
भुजगेन्द्रहारम् । सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।
कर्पूरपूरेण मनोहरेण सुवर्णपात्रान्तरसंस्थितेन । प्रदीसभासा सहसङ्गतेन
नीराजनं ते जगदीश ! कुर्वे ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ॐ भूर्भुवः स्वः अमुक-
देवाय नमः कर्पूरारार्तिक्यं समर्पयामि ॥ आचाराद्देववन्दनम् । हस्तेन
( शरीरे आरोग्यताप्राप्त्यर्थम् ) आत्मवन्दनम् । हस्तं प्रक्षाल्य अञ्जलौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुष्पाण्यादाय मन्त्रपुष्पाञ्जलिर्दद्यात् ॥ मन्त्रपुष्पाञ्जलिः ॥ ॐ गणानान्त्वा
गणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिप-
तिꣳहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ $\frac{१९}{२३}$ ॥
श्रीश्चतेलक्ष्मीश्चपत्क्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥
इष्णन्निषाणामुम्मइषाणसर्व्वलोकम्मइषाण ॥ $\frac{२२}{३१}$ ॥ अम्बेऽअम्बिके-
म्बालिकेनमानयतिकश्चन ॥ ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम्
॥ $\frac{२८}{२३}$ ॥ तन्तऽएतमनुजोषम्भराम्म्येषनेत्त्वदपचेतयाताऽअग्ग्नेःप्प्रियम्पा-
थोपीतम् ॥ सꣳस्रवभागास्त्थेषा बृहन्तःप्प्रस्तरेष्ठाःपरिधेयाश्च देवाः
॥ $\frac{१७}{२}$ | $\frac{१८}{}$ ॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्वानरमृतऽआजातमग्निम् ॥
कविꣳसम्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ $\frac{८}{३३}$ ॥ प्रोह्य-
माणःसोमऽआगतोव्वरुणऽआसन्द्यामासन्नोग्निराग्नीद्ध्रऽइन्द्रो हविर्द्धा-
नेथर्व्वोपावह्रियमाणः ॥ $\frac{५}{८}$ ॥ विश्वेदेवाऽअꣳशुषु न्युप्तोविष्णुराप्प्रीत-
पाऽआप्प्याय्यमानोयमःसूयमानोविष्णुःसम्भ्रियमाणोव्वायुःपूयमानः-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शुक्रः पूतः शुक्रः क्षीरं श्रीम्मन्थी सक्तु श्रीर्विश्वेदेवाः ॥ ५७/८ ॥ पितेवैधि सूनवऽआसुशेवा स्वावेशातन्वासंविशस्वाश्विनाध्वर्यूसादयतामिहत्त्वा ॥ पृथिव्याः पुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तु देवाः ॥ ३/१ ४/४ ॥ षोडशीस्तोमऽओजोद्रविणञ्चतुश्चत्वारिᳬशस्तोमोवर्चोद्रविणम् ॥ अग्नेः पुरीषमस्यप्सोनामतान्त्वाविश्वेऽअभिगृणन्तुदेवाः ॥ ३/१५ ॥ समिद्धेऽअग्नावधिमामहानऽउक्थपत्रऽईड्योगृभीतः ॥ तप्तङ्घर्म्मम्परिगृह्यायजन्तोर्जायद्यज्ञमयजन्तदेवाः ॥ ५५/१७ ॥ यस्येमाः प्रदिशोयस्यबाहू कस्मै देवाय हविषाविधेम ॥ यऽआत्मदा बलदा यस्यविश्वऽउपासतेप्रशिषँयस्यदेवाः ॥ १२।१३/२५ ॥ अनागास्त्वन्नोऽअदितिᳬकृणोतु क्षत्रन्नोऽअश्वोवनताᳬहविष्मान् ॥ इमा नु कम्भुवना सीषधामेन्द्रश्च विश्वे च देवाः ॥ ४५।४६/२२ ॥ बृहस्पते सवितर्बोधयैनᳬसᳬशितञ्चित्सन्तराᳬसᳬशिशाधि ॥ वर्द्धयैनम्महतेसौभगायविश्वऽएनमनु मदन्तु देवाः ॥ २८/७ ॥ प्रजापतेस्तपसा वावृधानः सद्यो जातो दधिषे यज्ञमग्ने ॥ स्वाहा-

कृतेन हविषा पुरोगा याहि साद्ध्याहविरदन्तु देवाः ॥ ३१/२२ ॥ सद्यो जातो व्यमिमीत यज्ञमग्निर्द्देवानामभवत्पुरोगाः ॥ अस्य होतुः प्रदिश्यृतस्य वाचि स्वाहाकृतं हविरदन्तु देवाः ॥ ३६/२१ ॥ अस्मे रुद्रा मेहना पर्व्वतासो वृत्रहत्ये भरहूतौ सजोषाः ॥ यः शंसते स्तुवते धायि पज्ज्रऽइन्द्रज्ज्येष्ठाऽ- अस्म्माँ २ ॥ अवन्तु देवाः ॥ ५०/३३ ॥ नहि स्प्पशमविदन्नन्न्यमस्म्माद्वैश्वान- रात्पुरऽएतारमग्नेः ॥ एमेनमवृधन्नमृताऽअमर्त्त्यं वैश्वानरं क्षैत्रजित्याय देवाः ॥ ६०/३३ ॥ यज्ञेन यज्ञमयजन्तदेवास्तानि धर्म्माणिप्रथमान्यासन् ॥ ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साद्ध्याः सन्ति देवाः ॥ ३६/३१ ॥ ॐराजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे । स मे कामा- न्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय महाराजाय नमः ॥ ॐस्वस्ति । साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं महाराज्यमाधिपत्यमयं समन्तपर्यायी स्यात्सार्वभौमः सार्वायुषऽ- आन्तादापरार्धात् । पृथिव्यै समुद्रपर्यन्ताया एकराडिति । तदप्येष श्लोकोऽ- १६

भिगीतो मरुतः परिवेष्टारो मरुत्तस्याऽऽवसन्गृहे । आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ ॐ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् ॥ सम्बाहुभ्यान्धमति सम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १६ ॥ जानामि पूजनमहं नहि शास्त्रसिद्धं शक्तिस्तु ते परिचिता मम सर्वतश्च । पुष्पाञ्जलिर्ननु मया चरणाब्जयोस्ते सन्दीयते परिगृहाण विसृज्य दोषान् ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः मन्त्रपुष्पाञ्जलिं सम० ॥ प्रदक्षिणा ॥ ॐ सप्तास्यासन्परिधयस्त्रिः सप्तसमिधः कृताः । देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥ यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्ति प्रदक्षिणपदे पदे ॥ ॐ भूर्भुवः स्वः अमुकदेवाय नमः प्रदक्षिणां सम० ॥ सङ्कल्पः ॥ अद्येत्यादि० शुभपुण्यतिथौ अमुकदेवप्रीतये यथाशक्ति मूलमन्त्रस्य[1] जपमहं करिष्ये ॥

---

१ शिवस्य ॐ नमः शिवाय, ॐ नमो भगवते रुद्राय । देव्याः ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे । विष्णोः ॐ नमो भगवते वासुदेवाय । गणेशस्य ॐ वक्रतुण्डाय हुम् । सूर्यस्य ॐ ह्रां ह्रीं ह्रौं सः श्रीसूर्याय नमः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्पणम् ॥ अमुकदेवप्रीत्यर्थं यथाशक्ति अमुकदेवस्य कृतेनानेन मूलमन्त्रजपकर्मणा अमुकदेवः प्रीयतां न मम ॥ विशेषार्घः ॥ अर्घपात्रे जलमादाय तस्मिन्गन्धाक्षतपुष्पाणि प्रक्षिप्य तदुपरि सहिरण्यं पूगीफलं नालिकेरादि फलं वा निधाय केवलं गन्धाक्षतपुष्पादिसहितं जलं वा गृहीत्वा विशेषार्घं दद्यात्। इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सुफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ रूपं देहि जयं देहि देहि भाग्यं तथा प्रभो ! ॥ पुत्रान्देहि धनं देहि सर्वान्कामाँश्च देहि मे ॥ ॐ भूर्भुव स्वः अमुकदेवाय नमः विशेषार्घं समर्पयामि ॥ स्तुतिपाठः ॥ आवाहनं न जानामि न

---

१ श्रीशङ्कराचार्यविरचितमानसपूजास्तोत्रम् । रत्नैः कल्पितमासनं हिमजलैः स्नानञ्च दिव्याम्बरं नानारत्नविभूषितं मृगमदामोदाङ्कितं चन्दनम् ॥ जातीचम्पकबिल्वपत्ररचितं पुष्पञ्च धूपं तथा दीपं देव दयानिधे पशुपते हृत्कल्पितं गृह्यताम् ॥ १ ॥ सौवर्णे नवरत्नखण्डरचिते पात्रे घृतं पायसं भक्ष्यं पञ्चविधं पयोदधियुतं रम्भाफलं पायसम् । शाकानामयुतं जलं रुचिकरं कर्पूरखण्डोज्ज्वलं ताम्बूलं मनसा मया विरचितं भक्त्या प्रभो स्वीकुरु ॥ २ ॥ छत्रं चामरयोर्युगं व्यजनकं चादर्शकं निर्मलं वीणाभेरिमृदङ्गकाहलकलागीतञ्च नृत्यं तथा । साष्टाङ्गं प्रणतिः स्तुतिर्बहुविधा ह्येतत्समस्तं मया सङ्कल्पेन समर्पितं तव विभो पूजां गृहाण प्रभो ॥ ३ ॥ आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं गृहं पूजा ते विषयोपभोग-



For Private and Personal Use Only

जानामि तवार्चनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर ! ॥ २ ॥ गतं पापं गतं दुःखं गतं दारिद्र्यमेव च ॥ आगता सुखसम्पत्तिः पुण्योऽहं तव दर्शनात् ॥ ३ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्ष मां परमेश्वर ॥ ४ ॥ मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर । यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ५ ॥ यदक्षरपदभ्रष्टं मात्राहीनञ्च यद्भवेत् ॥ तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥ ६ ॥ यद्दत्तं भक्तिभावेन पत्रं पुष्पं फलं जलम् । गृहाण कृपया देव तत्त्वं मे जगदीश्वर ॥ ७ ॥ भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ॥ त्वयि जातापराधानां त्वमेव शरणं मम ॥ अर्पणम् ॥ हस्ते जलं गृहीत्वा ॥ अनेनाऽऽवाहनाऽऽसनपाद्याऽऽचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणारार्तिक्यप्रदक्षिणामन्त्रपुष्पाञ्जलिरूपैः षोडशोप-

---

रचना निद्रा समाधिस्थितिः । सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥ ४ ॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् । विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥ ५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारैरन्योपचारैश्च यथाज्ञानेन (यथामिलितोपचारद्रव्यैर्वा) कृतेनानेन पूजनकर्मणा अमुकदेवः प्रीयतां न मम ॥ ॐ तत्सद्ब्रह्मार्पणमस्तु ॥ शङ्खभ्रामणम् ॥ शङ्खमध्ये स्थितं तोयं भ्रामितं केशवोपरि। अङ्गलग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति ॥ ततो देवतीर्थग्रहणम् ॥ अकालमृत्युहरणं सर्वव्याधिविनाशनम् ॥ देव (देवी) पादोदकं पीत्वा जठरे धारयाम्यहम् ॥ ततो देवनिर्माल्येन शिरसि मार्जनम् ॥ देवनिर्माल्यतोयेन योऽङ्गानि परिमार्जयेत्। आधयस्तस्य नश्यन्ति व्याधीनां तु कथैव का ॥ ततो विष्णुस्मरणम् ॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्। ॐ विष्णवे नमः। ॐ विष्णवे नमः। ॐ विष्णवे नमः ॥

साम्प्रतं मोहमयीवास्तव्येन आचार्यावटङ्केन अमृतलाल त्रिकमजी शास्त्रिणा जामनगरनिवासिना सङ्गृहीतः संशोधितोऽयं वैदिकः पौराणिकश्च सर्वदेवसामान्यो देवपूजनप्रयोगः समाप्तः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहरिः ॥

जामनगरनिवासी शास्त्री—अमृतलाल त्रिकमजी आचार्ये तैयार करेला

# वैदिककर्मकाण्डना तथा पौराणिक ग्रन्थो.

१ **श्रीलक्ष्मीपूजनप्रयोगः**—( खास दिवाळी माटे ) वैदिकमंत्रो अने पुराणोक्त श्लोकोसहित गणपतिपूजन, स्वस्तिपुण्याहवाचन अने शास्त्रिजी विरचित भाववाही नूतन श्लोको साथे चित्रलेखिनीसमन्वितश्रीमहाकालीमहालक्ष्मीमहासरस्वतीनुं विस्तृत पूजन आपवामां आव्युं छे. **किंमत रु.-१-०-०**

२ **वैदिकः पौराणिकश्च सर्वदेवसामान्यो देवपूजनप्रयोगः**—पञ्चायनदेवतास्थापनकोष्ठक, देवपूजनप्रयोग. (पुराणोक्त अने वेदोक्त मंत्रो सहित) केटलेक स्थले उपयोगि "अमृतवर्षिणी" टिप्पणी पण आपी छे. **किंमत रु.-०-८-०**

३ **श्रीसत्यनारायणकथा**—( श्रीसत्यनारायणकथानुं सरळ गुजरातीभाषान्तर ) वैदिक अने पुराणोक्त शान्तिसूक्त, प्रधानसङ्कल्प, शङ्खघण्टार्चन, भूतोत्सादन, गणपतिपूजन, स्वस्तिपुण्याहवाचन, मण्डूकादिपीठदेवतास्थापन, नूतन मूर्तिनी प्राणप्रतिष्ठा अने शास्त्रीजी विरचित नूतन श्लोको साथे श्रीसत्यनारायणदेवनुं विस्तृतपूजन आपवामां आव्युं छे. **किंमत रु.-१-१२-०**

४ **श्रीशुक्लयजुःशाखीयः स्मार्तकर्माङ्गगणपतिपूजनादिमण्डपप्रवेशान्तप्रयोगः**—वैदिक तेमज पुराणोक्त कोई पण यज्ञ-यागादिस्मार्तकर्मना प्रारम्भमां उपरोक्त कर्म थाय छे. शास्त्रार्थनी माहितीवाळी "अमृतवर्षिणी टिप्पणी" साथे ग्रन्थ तैयार कर्यो छे. टिप्पणीमां महारुद्र, शतचण्डी, विष्णुयाग अने पुराणोक्तविष्णुयागना सङ्कल्पो पण आप्या छे. **—छपाय छे.**

प्रकाशक—**निर्णयसागर प्रेस, मुंबई २**

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

★

अयं "वैदिकः पौराणिकश्च सर्वदेवसामान्यो देवपूजनप्रयोगः" साम्प्रतं मुम्बापुरीवास्तव्येन आचार्योपटङ्केन अमृतलाल त्रिकमजी शास्त्रिणा निर्णयसागरकृते सङ्गृहीतः संशोधितश्च स च मुम्बापुर्यां सत्यभामाबाई पाण्डुरङ्ग इत्येताभिः प्रसिद्धिं नीतः ॥

---

ग्रन्थस्यास्य सर्वाधिकाराः प्रकाशकायत्ताः सन्ति ।

---

शके १८७२, सन १९५१.

पब्लिशर–सत्यभामाबाई पांडुरंग, प्रिंटर–रामचंद्र येसू शेडगे. } निर्णयसागर प्रेस, २६।२८ कोलभाट स्ट्रीट, मुंबई.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only